# Shri Surasuranandacharyavirachita Shrivaishnavadinacharya

# શ્રીસુરસુરાનન્દાચાર્યવિરચિતા શ્રીવૈષ્ણવદિનચર્યા

## Document Information

Text title : Shri Surasuranandacharyavirachita Shrivaishnavadinacharya

File name : vaiShNavadinacharyA.itx

Category : vishhnu, rAmAnanda, advice, upadesha, raama

Location : doc_vishhnu

Author : surasurAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampraday Dig-Darshan

Latest update : November 11, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 11, 2023

*sanskritdocuments.org*

# શ્રીસુરસુરાનન્દાચાર્યવિરચિતા શ્રીવૈષ્ણવદિનચર્યા

પ્રણમ્ય ભાષ્યકૃદ્રામાનન્દાચાર્યં ચ રાઘવમ્ ।
વૈષ્ણવદિનચર્યાં હિ કલ્યાણીં બોધયામ્યહમ્ ॥ ૧॥

સ્નાનસન્ધ્યાદિકં કાર્યં સ્તુત્વા પ્રાતર્હિ રાઘવમ્ ।
જપ્યઃ શ્રીરામમન્ત્રશ્ચ કર્તવ્યં રામપૂજનમ્ ॥ ૨॥

ઊર્ધ્વપુણ્ડ્રં સદા કાર્યં શ્રીયુતં હિ મુમુક્ષુભિઃ ।
ગ્રીવાયાં તુલસીમાલાદ્વયં ધાર્યં ચ વૈષ્ણવૈઃ ॥ ૩॥

વૈષ્ણવાશ્ચ નમસ્કાર્યા દણ્ડવદ્ વૈષ્ણવૈઃ સદા ।
અગ્રાહ્યં વૈષ્ણવૈર્નિત્યં નિષિદ્ધં ચાનિવેદિતમ્ ॥ ૪॥

શ્રીમદાનન્દભાષ્યાદિગ્રન્થાનાં પઠનં તથા ।
ચિન્તનં વૈષ્ણવૈઃ કાર્યં સ્વાચાર્યાણાં ચ પૂજનમ્ ॥ ૫॥

વૈષ્ણવૈર્મૂલમન્ત્રેણ બોદ્ધવ્યમર્થપઞ્ચકમ્ ।
કર્ત્તવ્યા નવધા ભક્તિઃ શ્રીસીતારામચન્દ્રયોઃ ॥ ૬॥

પરમ્પરાનુસન્ધેયા રામભક્તૈર્હિ વૈષ્ણવૈઃ ।
દ્વયમન્ત્રાનુસન્ધાનં કાર્યં શ્રીવૈષ્ણવૈઃ સદા ॥ ૭॥

વાસઃ સહૈવ કર્ત્તવ્યો દ્વયનિષ્ઠૈશ્ચ વૈષ્ણવૈઃ ।
કર્ત્તવ્યા સઙ્ગતિર્નૈવ સંસારિણાં તુ ગર્વિણામ્ ॥ ૮॥

અસાત્ત્વિકાચ્ચ લૌકિકાદ્ વૃત્તાત્ કાર્યા પૃથક્ સ્થિતિઃ ।
ઔદાસીન્યં પરિત્યાજ્યં શ્રીવૈષ્ણવેષુ સર્વદા ॥ ૯॥

મનૂક્તા દશ ધર્માશ્ચ પાલનીયાઃ પ્રયત્નતઃ ।
વ્રતોત્સવૌ ચ કર્ત્તવ્યૌ વૈષ્ણવૌ વૈષ્ણવૈર્મુદા ॥ ૧૦॥

દૃષ્ટાર્થોઽનનુવર્ત્યો હિ ત્યાજ્યસંસારિદેહિનામ્ ।
રામસ્ય ચ તદીયાનાં નિન્દા કાર્યા ન કર્હિચિત્ ॥ ૧૧॥

સ્વદોષદર્શનં કાર્યં સતતં વૈષ્ણવૈર્જનૈઃ ।
સ્વપ્રશંસા ન કર્ત્તવ્યા શ્રીવૈષ્ણવૈર્મુમુક્ષુભિઃ ॥ ૧૨॥

સ્વસ્વાતન્ત્ર્યં નિવર્ત્યાથ વૈષ્ણવપરતન્ત્રતા ।
વૈષ્ણવૈરનુસન્ધેયા સ્વીયાઽત્ર સર્વદા જનૈઃ ॥ ૧૩॥

પરિહારશ્ચ કર્ત્તવ્યો ભક્તૈર્ગર્વસ્ય સર્વથા ।
અસાધૂનાં પરિત્યાગઃ સાધૂનાં ચ પરિગ્રહઃ ॥ ૧૪॥

સ્વરૂપવર્ધકં કાર્યં સદાચાર્યપ્રસાદનમ્ ।
જ્ઞેયશ્ચ પરમોપાયઃ શ્રીરામઃ સર્વકારણમ્ ॥ ૧૫॥

ઉપકારસ્મૃતિઃ કાર્યા રામસ્ય સકલેશતુઃ ।
અમોઘા સંસ્તુતિઃ કાર્યા રામસ્ય પરમાત્મનઃ ॥ ૧૬॥

શ્રીરામે ચ તદીયેષુ નિષ્ઠા કાર્યા મુમુક્ષુભિઃ ।
ઉપેક્ષા નૈવ કર્ત્તવ્યા કસ્યચિત્ પ્રાણિનઃ ખલુ ॥ ૧૭॥

શ્રીરામજ્ઞાનશૂન્યાશ્ચ દોષશૂન્યા વિભાવ્યતામ્ ।
રામવૃત્તં ચ સંશ્રાવ્ય કાર્યસ્તેષાં સમાદરઃ ॥ ૧૮॥

નિષ્ઠા ભાગવતી જ્ઞેયા શ્રીરામસ્ય પ્રસાદતઃ ।
પ્રાયશ્ચિત્તાદિના નૈવ સન્નિષ્ઠા જાયતે ખલુ ॥ ૧૯॥

નિષાદગૃધ્રવૃત્તં હિ પ્રમાણં તત્ર વિદ્યતે ।
વૈષ્ણવાનાં મુમુક્ષૂણામેતે ચાર્થા અપેક્ષિતાઃ ॥ ૨૦॥

શ્રીમત્સુરસુરાનન્દાચાર્યેણ નિર્મિતા શુભા ।
વૈષ્ણવદિનચર્યેયં ભૂયાત્ કલ્યાણકારિણી ॥ ૨૧॥

ઇતિ શ્રીસુરસુરાનન્દાચાર્યવિરચિતા શ્રીવૈષ્ણવદિનચર્યા સમ્પૂર્ણા ।

Encoded and proofread by Mrityunjay Pandey

*Shri Surasuranandacharyavirachita Shrivaishnavadinacharya*

pdf was typeset on November 11, 2023

Please send corrections to *sanskrit@cheerful.com*